Digitization by eGangotri-South Center

संस्कृतभाषाप्रचारिण्याः ग्रन्थमालायाः सप्तमं कुसुमम्

वाणीं भजत गैर्वाणीम्

समासकुसुमावलिः

श्री नडिमिण्टि सर्वमङ्गळशास्त्रिविरचिता

श्री आ. वरदराजरचितया

लघुटीकया सहिता

18.3
C.M

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा,

चित्तूरु. (आ.. प्र.)

1990

शुक्ल- फाल्गुणः) (मूल्यम् 3—00

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथमावृत्तिः	१९५६	—
द्वितीयावृत्तिः	१९६२	—
तृतीयावृत्तिः	१९७०	—
चतुर्थावृत्तिः	१९७१	(२००० मूर्तयः)
पञ्चमावृत्तिः	१९९०	(१००० मूर्तयः)

सर्वस्वाम्यं सभाधीनम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीः

समासकुसुमावलिः

संस्कृतभाषायां सुबन्तपदानि व्यस्तानि समस्तानि च प्रयुज्यन्ते। तत्र समस्तपदानां समासः बहुधा भवति। स एव अस्मिन् ग्रन्थे निरूपयिष्यते।

समासो नाम कः?

अनेकपदानां (विभक्त्यादिलोपेन) एकपदत्व-व्यवहारः यत्र भवति, स समासः। स संक्षेपतः षोढा भवति।

समासाः	तद्भेदाः
१. तत्पुरुषसमासः।	८
२. कर्मधारयसमासः।	७
३. द्विगुसमासः।	२
४. बहुव्रीहिसमासः।	७
५. अव्ययीभावसमासः।	२
६. द्वन्द्वसमासः।	४

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतदन्तर्गताः विशेषसमासाश्च इमे —

अलुक्समासः, गतिसमासः, नित्यसमासः, असमर्थसमासः इति समासातिरिक्ताः कृदादयः वृत्तयः चतस्रः पश्चान्निरूपयिष्यन्ते ।

विग्रहो नाम कः?

समासार्थं प्रतिपादकं वाक्यं विग्रहसंज्ञकं भवति ।

भूनायकं वा धननायकं वा
भजन् भुवं वा धनमेति लोके ।
तद्विघ्ननाथं न भजामि किन्तु
महत्तमस्तं प्रणमामि नित्यम् ॥

भावार्थः — लोके भूस्वामिनं, धनिकं वा सेवमानः अर्थी भुवं, धनं वा लभते । तुल्यन्यायेन यदि कश्चित् विघ्ननाथं प्रार्थयते तर्हि तस्य विघ्नप्राप्तिरेव स्यात् । अतो हेतोः अहं विघ्ननाथं न भजामि, किन्तु तं नित्यं बहुवारं प्रणमामि । एवं छलेन कविः स्वेष्टदेवतास्तुतिं मकरोत् ।

श्रीमत्पाणिनिसूत्राणि समालोच्य यथामति ।
बालव्युत्पत्तये कुर्मः समासकुसुमावलिम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः — श्रीमतः पाणिनिमहर्षेः व्याकरण-सूत्राणि सम्यक् परिशील्य, यथाज्ञानं संस्कृत-जिज्ञासुना सुखबोधाय समासकुसुमावलिः विरच्यते ।

॥ तत्पुरुषसमासनिरूपणम् ॥

तत्पुरुषोऽष्टविधोऽभूत् प्रथमादिविभक्तिनञ्कृतैर्भेदैः ।
उत्तरपदजनितार्थो, मुख्यस्तत्रेति पण्डितैः ख्यातः ॥

भावार्थः — प्रथमादिसप्तम्यन्तं सप्तविभक्तिभिः, नञा च तत्पुरुषः अष्टविधः । अत्र उत्तरपदार्थः मुख्यः । उत्तरपदार्थप्रधानः तत्पुरुषः ।

१, प्रथमातत्पुरुषः

अमृतं योऽपिबद्दैत्यस्तं वैकुण्ठो द्विधाऽच्छिनत् ।
राहुरुत्तरकायोऽस्य पूर्वकायोऽभवच्छ्वजः ॥

भावार्थः — यो दैत्यः अमृतमपिबत्, तं विष्णुः द्वेधा अच्छिनत् । अस्य उत्तरकायः राहुः, पूर्वकायो ध्वजश्च (केतुः) अभवत् ।

उदाहरणानि — उत्तरः कायस्य - उत्तरकायः, पूर्वः कायस्य - पूर्वकायः (अर्धं पिप्पल्याः - अर्धपिप्पली) इत्येवमादयः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. द्वितीयातत्पुरुषः

दुःखातीतो भवत्येव यदि कृष्णश्रितो जनः ।
अथवाऽन्नबुभुक्षुस्सन् मुहूर्तंस्सुखमश्नुते ॥

भावार्थः — यदि नरः कृष्णं आश्रयति तर्हि सः दुःखेभ्यः विमुच्यते । अथवा विषयलोलुपो भूत्वा क्षणिकं सुखं प्राप्नोति ।

उदा — दुःखं अतीतः - दुःखातीतः, कृष्णं श्रितः- कृष्णश्रितः, अन्नं बुभुक्षुः - अन्नबुभुक्षुः, मुहूर्तं सुखं - मूहूर्तसुखम् (खट्वां आरूढः) इत्येवमादयः ।

३. तृतीयातत्पुरुषः

मासावरस्त्वं खलु मासपूर्व –
स्त्वहं तु विद्याविपुणो नितान्तम्
इतीव संसद्यपि बाडबानां
परस्परं वाक्कलहो बभूव ॥

भावार्थः — "त्वं मासावरः खलु, अहं तु मासपूर्वः, नितान्तं विद्यया निपुणश्च' इत्येवं ब्राह्मणानां सभायामपि परस्परं वाक्कलहः अभवत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदा – मासेन अवरः मासावरः, मासेन पूर्वः - मासपूर्वः, विद्यया निपुणः - विद्यानिपुणः, वाचा कलहः - वाक्कलहः (पित्रा सदृशः - पितृ सदृशः) इत्येवमादयः ।

४, चतुर्थीतत्पुरुषः

गृही भूतबलिं दत्ते गोसुखं तु कृषीवलः ।
दत्ते यष्टा यूपदारु कुण्डलाष्टापदं बुधः ॥

भावार्थः — गृहस्थः भूतबलिं ददाति; कृषीवलस्तु गोसुखम् । यागकर्ता यूपस्तम्भं ददाति; पंडितश्च कुण्डलनिर्माणार्थं सुवर्णम् ।

उदा – भूतेभ्यः बलिः - भूतबलिः, गोभ्यः सुखं - गोसुखं, यूपाय दारु - यूपदारु, कुण्डलाय अष्टापदं कुण्डलाष्टापदम्, (गवे हितं - गोहितं) इत्यादयः ।

५. पञ्चमीतत्पुरुषः

पूर्वं चोरभयं प्राप्य व्याघ्रभीत स्ततः परम् ।
सुखापेतो जन स्सम्यगरण्ये निवसेत्कथम् ॥

भवार्थः — प्रथमतः चोरभयं प्राप्य, ततः पश्चात् व्याघ्रभयं च प्राप्य, सुखापेतः सन् जनः अरण्ये सम्यक् कथं निवसेत्? अरण्यवासः सर्वथा भयावह इति भावः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदा – चोरात् भयं - चोरभयं, व्याघ्रात् भीतः - व्याघ्रभीतः, सुखात् अपेतः सुखापेतः, (वृक्षात् पतितः. वृक्षपतितः) इत्यादयः ।

६. षष्ठीतत्पुरुषः

अधिकं राजपुरुष स्सेव्य स्सर्वमहान् यतः ।
वृक्षमूलमुपाश्रित्य जपतो देवपूजकात् ।।

भावार्थः — राजपुरुषः, वृक्षमूले उपविश्य जपतः, देवपूजकात् अधिकं सेव्यः यतः सः सर्वैः पूज्यते ।

उदा – राज्ञः पुरुषः - राजपुरुषः, सर्वेषां महत्तमः - सर्वमहान्, वृक्षस्य मूलं - वृक्षमूलं, देवानां पूजकः - देव - पूजकः, (वृक्षाणां छाया - वृक्षच्छायं) इत्यादयः ।

प्राश्यान्नमीश्वराधीनं स्थालीपक्वं तु मानवः ।
वर्त्मन्यातपशुष्कस्सन् दानशौण्डः कथं भवेत्?

भावार्थः — मानवः भगवदायत्तं अल्पमात्रे पक्वं च अन्नं भुक्त्वा, मार्गे सूर्यातपे शुष्कश्च सन्, दानवीरः कथं भवेत्? यस्य हि उदारहृदयस्य सकाशे पुष्कलं धन मस्ति स एव दानवीरः भवितुं अर्हति । यश्च नित्यं प्रातरारभ्य आसायं भगवन्नाम स्मारं स्मारं भिक्षाटनेन लब्धं, स्वयं पक्त्वा भुङ्क्ते, स अन्येभ्यो दद्यात् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदा — ईश्वरे अधीनं ईश्वराधीनं, स्थाल्यां पक्वं - स्थालीपक्वं, आतपे शुष्कः - आतपशुष्कः, दाने शौण्डः - दानशौण्डः, (साङ्काश्येसिद्धः - साङ्काश्यसिद्धः) इत्येवमादयः ।

७. नञ्तत्पुरुषः

अज्ञानात्पाप माप्नोति पापा दब्राह्मणो भवेत् ।
तस्माविच्छन्ति तत्त्यक्तु मभवायैव पण्डिताः ।।

भावार्थः — अज्ञानात् पापं करोति । पापाचरणेन संस्कारशून्यः व्रात्यो भवति । तस्मादेव पण्डिताः जननमरणराहित्याय तत् अज्ञानं त्यक्तुं इच्छन्ति ।

उदा — न ज्ञानं - अज्ञानं, न ब्राह्मणः- अब्राह्मणः, न भवः - अभवः, (न अश्वः - अनश्वः इत्येवमादयः ।

॥ कर्मधारयसमासनिरूपणम् ॥

कविधि स्सप्तविध स्स्या दित्येवं कर्मधारयः कथितः ।
तत्पुरुषान्तर्भावात् तद्वत्प्राधान्य मीरितं चास्य ।।

भावार्थः — 'कर्मधारयसमासः सप्तविध' इत्येवं पण्डिताः वदन्ति । कर्मधारयसमासः तत्पुरुषसमासे अन्त-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भवतीति हेतोः तत्पुरुषसमासः इव कर्मधारयसमासोऽपि उत्तरपदार्थप्रधानो भवति ।

विशेषणं पूर्वपदे विशेष्यं तथोभयत्रापि विशेषणं च ।
यस्योपमानं परतस्तदादौ सम्भावना चाप्यवधारणा च ।।

भावार्थः — 'कर्मधारयसमासः सप्तविधः ।

१. विशेषणपूर्वपदकर्मधारयः ।
२. विशेष्यपूर्वपदकर्मधारयः ।
३. विशेषणोभयपदकर्मधारयः ।
४. उपमानोत्तरपदकर्मधारयः ।
५. उपमानपूर्वपदकर्मधारयः ।
६. सम्भावनापूर्वपदकर्मधारयः ।
७. अवधारणापूर्वपदकर्मधारयः इति ।

१. विशेषणपूर्वपदकर्मधारयः

नीलोत्पलानि नारीणां नयनानीव रेजिरे ।
कम्पितान्यल्पवातेन सत्सरस्सु स्थितान्यहो ।।

भावार्थः — सरोवरेषु स्थितानि नीलोत्पलानि अल्पवातेन कम्पितानि सन्ति, नारीणां नयनानीव विलसन्ति । महदिदं आश्चर्यम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदा — नीलानि च तानि उत्पलानि च - नीलोत्पलानि, अल्पश्चासौ वातश्च - अल्पवातः, सन्ति च तानि सरांसि च - सत्सरांसि, (रम्या च सा लता च रम्यलता) इत्येव मादयः।

२. विशेष्यपूर्वपदकर्मधारयः

उद्वीक्ष्य यस्य मातङ्गान् घना इति मनीषया।
मयूरव्यंसका हृष्टा ननृतु स्तं नृपं भजे॥

भावार्थः — यस्य नृपस्य गजान् दृष्ट्वा मेघा इति मत्वा सन्तुष्टाः मयूराः नृत्यं अकुर्वन्, तं नृपं आश्रये।

उदा — व्यंसकाश्च ते मयूराश्च - मयूरव्यंसकाः, (खसूचिश्चासौ वैयाकरणश्च - वैयाकरणखसूचिः) इत्येवमादयः।

३. विशेषणोभयपदकर्मधारयः

पुंसां स्नातानुलिप्तानां मन्नं भोज्योष्ण मेव हि।
पथ्य मित्यब्रवी द्वैद्य श्शास्त्रे निश्चप्रचं वचः॥

भावार्थः — स्नातानां तथा अनुलिप्तानां च पुरुषाणां भोज्योष्णं अन्नमेव हि पथ्यमिति शास्त्रे निश्चप्रचं वचः वैद्यः अवदत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदा — स्नाताश्च ते अनुलिप्ताश्च - स्नातानुलिप्ताः, भोज्यं च तत् उष्णं च - भोज्योष्णं, निश्चितं च तत् प्रचितं च - विश्चप्रचं इत्येवमादयः ।

४. उपमानोत्तरपदकर्मधारयः

रामोऽयं पुरुषव्याघ्र स्संवृतः कविकुञ्जरैः ।
हनिष्यति बला द्युद्धे रावणं राक्षसर्षभम् ।।

भावार्थः — पुरुषश्रेष्ठः अयं रामः कपिश्रेष्ठैः परिवृतः सन् युद्धे बलात् राक्षसश्रेष्ठं रावणं हनिष्यति ।

उदा — पुरुषो व्याघ्र इव - पुरुषव्याघ्रः, कपयः कुञ्जरा इव - कपिकुञ्जराः, राक्षसः ऋषभ इव - राक्षसर्षभः, (कविः वराह इव-कविवराहः) इत्येवमादयः।

५. उपमानपूर्वपदकर्मधारयः

कौमुदीविशदा भाति या वाणी रतिसुन्दरी ।
लतातन्वी सदा दद्यात्सा द्राक्षामधुरां गिरम् ।।

भावार्थः — या चन्द्रिकेव शुभ्रा, रतिरिव सुन्दरी च प्रकाशते, सा लतांगी सरस्वती सर्वदा द्राक्षावत् मधुरां वाचं मह्यं दद्यात् ।

उदा — कौमुदी इव विशदा - कौमुदीविशदा, रतिः इव सुन्दरी - रतिसुन्दरी, लता इव तन्वी - लता-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तन्वी, द्राक्षा इव मधुरा - द्राक्षामधुरा (घन इव श्यामः - घनश्यामः) इत्येवमादयः ।

६. सम्भावनापूर्वपदकर्मधारयः

तमालवृक्षै रभितस्संवृतो विन्ध्यपर्वतः ।
बभ्रमुः सकलै र्दृष्टो दूराद्गजमनीषया ।।

भावार्थः — तमालवृक्षैः सर्वतः परिवृतं विन्ध्य पर्वतं दूरात् दृष्ट्वा भ्रमराः गजं मत्वा भ्रमन्ति स्म ।

उदा — तमाल इति वृक्षः - तमालवृक्षः, विन्ध्य इति पर्वतः - विन्ध्यपर्वतः गज इति मनीषा - गजमनीषा, (मेघ इति छलं - मेघच्छलं) इत्येवमादयः ।

७. अवधारणापूर्वपदकर्मधारयः

मनीषासलिलै र्युक्तिरत्नै र्वाक्कल्पनोर्मिभिः ।
यशस्सरिद्भि स्सम्पन्नो भात्ययं कविसागरः ।।

भावार्थः – मनीषया, युक्तिभिः, वाक्कल्पनाभिः, यशसा च सम्पन्नः अयं कविः, सलिलैः, रत्नैः, ऊर्मिभिः, तदीभिश्च सम्पन्नः समुद्र इव विराजते ।

उदा — मनीषा एव सलिलानि, - मनीषासलिलानि, युक्तयः एव रत्नानि - युक्तिरत्नानि, कल्पना एव ऊर्मयः - कल्पनोर्मयः, यशांसि एव सरितः - यशस्सरितः, कविः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एव सागरः - कविसागरः, (विनय एव धनं - विनयधनं) इत्येवमादयः ।

।। द्विगुसमासनिरूपणम् ।।

स चैकवद्भाव्यनेकवद्भावीति द्विधा द्विगुः ।
कर्मधारय एवास्यापन्तर्भावो बुधै र्मतः ।।

भावार्थः — द्विगुसमासः एकवद्भावी, अनेकवद्भावी चेति द्विविधः । कर्मधारयसमासे एव अयं द्विगुसमासः अन्तर्भवतीति पण्डिता वदन्ति ।

१. एकवद्भावी द्विगुः

पञ्चवट्या समं क्षेत्रं त्रिलोक्यां न हि विद्यते ।
तत्र पञ्चगवं दत्वा जनः श्रेष्ठपदं व्रजेत् ।।

भावार्थः — पञ्चवटीसमं क्षेत्रं कुत्रापि नास्ति । यदि जनः तत्र पञ्चवटीक्षेत्रे पञ्च गाः दद्यात्, तदा स श्रेष्ठं पदं लभेत ।

उदा — पञ्चानां वटानां समाहारः - पञ्चवटी त्रयाणां लोकानां समाहारः - त्रिलोकी, पञ्चानां गवां समाहारः - पञ्चगवं, (त्रयाणां भुवनानां समाहारः - त्रिभुवनम्) इत्येवमादयः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. अनेकवद्भावी द्विगुः

युद्धेषु विबुधा स्सर्वे बाडबाश्चाध्वरेष्वपि ।
गायन्ति यं कार्यसिद्धयै भजे षाण्मातुरं मुदा ।

भावार्थः — सर्वे देवा युद्धेषु, भूदेवाश्च अध्वरेषु यं कार्यसिद्धयर्थं स्तुवन्ति, तं कुमारस्वामिनं सभक्तिश्रद्धं भजामि ।

उदा — षण्णां मातणां अपत्यं पुमान्- षाण्मातुरः,
(अष्टसु कपालेषु संस्कृतः पुरोडाशः - अष्टाकपालः) इत्येवमादयः ।

।। बहुव्रीहिसमासनिरूपणम् ।।

सप्तभि राख्याभि र्वा विख्यातो य स्स वा बहुव्रीहिः ।
अन्यपदार्थो मुख्यः कथितो विबुधै र्बहुवीहौ ।।

भावार्थ. — बहुव्रीहिसमासः सप्तविधः । अन्यपदार्थप्रधानो बहुव्रीहिरिति पण्डिता वदन्ति ।

बहुव्रीहिसमासः सप्तविधः । यथा —

१. द्विपदबहुव्रीहिः ।
२. बहुपदबहुव्रीहिः ।
३. संख्योभयपदबहुव्रीहिः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४. संख्योत्तरपदबहुव्रीहिः ।
५. दिगन्तराळलक्षणबहुव्रीहिः ।
६. सहपूर्वपदबहुव्रीहिः ।
७. व्यतिहारलक्षणबहुव्रीहिः ।

१. द्विपदबहुव्रीहिः

प्राप्ताग्निमेव मिषु मूढरथानथाश्वान्
तूणीर मुद्धृतशरं च वहन् जवेन ।
रुद्रोऽपि वीरपुरुषा स्स पुरो बिभेद
देवैश्च दत्तपशुरेव महाबल स्सन् ॥

भावार्थः — पुरा देवैः प्रार्थितः रुद्रः जवनाश्वैर्युतं रथमधिरुह्य सुतीक्ष्णैः बाणैः त्रिपुरासुरसंहारं अकरोत् ।

उदा — प्राप्तः अग्निः यं सः - प्राप्ताग्निः, ऊढः रथः यैस्ते ऊढरथाः, दत्तः पशुः यस्मै सः - दत्तपशुः, उद्धृताः शराः यस्मात् सः - उद्धृतशरः, महत् बलं यस्य सः - महाबलः, वीराः पुरुषाः यासु ताः वीरपुरुषाः इत्येवमादयः ।

२. बहुपदबहुवीहिः

नीलोज्ज्वलवपुः पातु श्रीमत्पीताम्बरो हरिः ।
यस्य प्रसादा त्कुब्जाऽभू द्दिव्यसुन्दरविग्रहा ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः — नीलमेघश्यामलः पीताम्बरधारी च श्रीमहाविष्णुः अस्मान् रक्षतु, यस्य अनुग्रहेण कुब्जा रतिरिव सुन्दरी जाता ।

उदा — नीलं उज्ज्वलं च वपुः यस्य सः - नीलोज्ज्वलवपुः, श्रीमत् पीतं अम्बरं यस्य सः श्रीमत्पीताम्बरः, दिव्यः सुन्दरः विग्रहः यस्या सा - दिव्यसुन्दरविग्रहा इत्येवमादयः ।

३. सङ्ख्योभयपदबहुव्रीहिः

काननेऽस्मिन्नहो राजन् द्वित्रै रायासिता जनैः ।
लभ्यन्ते पञ्चषा नागा इत्यूचु र्बलिनः प्रभुम् ॥

भावार्थः — केचित् बलशालिनः स्वप्रभुं प्रति अवदन् — हे राजन्! अस्मिन् वने कतिपयैः जवैः त्रासिताः पञ्च वा षट् वा गजाः लभ्यन्ते' इति ।

उदा – द्वौ वा त्रयो वा - द्वित्राः, पञ्च वा षट्वा- पञ्चषाः, (त्रयो वा चत्वारो वा - त्रिचतुराः) इत्येवमादयः ।

४. सङ्ख्योत्तरपदबहुव्रीहिः

ब्रह्मणः कति वा रुद्रा वद त्वमिति सङ्ख्यया ।
कुशल स्त्वेकया युक्त्या वदे दुपदशा इति ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः – ब्रह्माणः कति? रुद्राश्च कति? त्वं ब्रूहि इति पृष्टो जनः कुशलश्चेत्, तर्हि एकेनैव पदेन 'उपदशाः' इति समाधानं ब्रूयात्। नव एकादश चेति भावः।

उदा - दशानां समीपे ये सन्ति ते - उपदशाः (एकादशानां समीपे ये सन्ति ते - उपैकादशाः) इत्येव - मादयः।

५. सहपूर्वपदबहुव्रीहिः

सकला स्सह सन्तानाः सकला अपि बाडबाः।
प्रोचु स्स्वस्ति महीपाय सहपुत्राय सन्ततम्॥

भावार्थः – सर्वशास्त्रकुशलाः सन्तानवन्तश्च सर्वे ब्राह्मणाः सपुत्राय राज्ञे सदा स्वस्तीत्यवदन्।

उदा – कलाभिः सह वर्तन्ते इति - सकलाः, सन्तानैः सह वर्तन्ते इति - सहसन्तानाः, पुत्रेण सह वर्तते इति - सहपुत्रः इत्येवमादयः।

६. दिगन्तराळलक्षणबहुव्रीहि।

विद्युदुत्तरपूर्वाया समोघो मारुतोऽथवा।
यदि दक्षिणपूर्वायां वृष्टिं चैव भवेत्तदा॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः – ईशान्यदिशायां यदि विद्युत् विद्योतते तदा प्रचण्डो वायु र्वाति, अथवा आग्नेयदिशायां यदि विद्युत् विद्योतते तो तर्हि वृष्टि र्न भवतीति दैवज्ञाः वदन्ति ।

उदा – उत्तरस्याश्च पूर्वस्याश्च दिशो र्यदन्तराळं सा- उत्तरपूर्वा, दक्षिणस्याश्च पूर्वस्याश्च दिशो र्यदन्तराळं सा - दक्षिणपूर्वा इत्येवमादयः ।

७. व्यतिहारलक्षणबहुव्रीहिः

बाहूबाहवि केषांचिन्मुष्टीमुष्टचद्भुतं तथा ।
केशाकेश्यभवद्युद्धं वानराणां च रक्षसाम् ।।

भावार्थः – लङ्कायां वानराः राक्षसाश्च परस्परं बाहुभिः केशेषु गृहीत्वा परस्परं मुष्टिभिः प्रहृत्य च युद्धं अकुर्वन् ।

उदा – बाहुभिः बाहुभिश्च गृहीत्वा इदं युद्धं प्रवृत्तं- बाहूबाहवि, मुष्टिभिः मुष्टिभिश्च प्रहृत्येदं युद्धं प्रवृत्तं - मुष्टीमुष्टि, केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं - केशाकेशि इत्येवमादयः ।

।। अव्ययीभावसमासनिरूपणम् ।।

यस्याऽभव त्पूर्वपदेऽव्ययस्य
नाम्नो विधानाद् द्विविधं च लक्ष्म ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पूर्वः पदार्थोऽपि च यत्र मुख्य
स्तमव्ययीभावमुदाहरामः ।।

भावार्थः – अस्मिन् समासे पूर्वपदं अव्ययं, नामवाचकं च भवति। अतोऽयं समासः द्विविधः — (१) अव्ययपूर्वपदाव्ययीभावः (२) नामपूर्वपदाव्ययीभाव श्चेति। किञ्च, अयं समासः पूर्वपदार्थप्रधानः इति वदन्ति।

१. अव्ययपूर्वपदाव्ययीभावः

भो राजन् प्रत्यहं भूया द्यथाशक्त्यधिबाडबम् ।
भक्ति स्तयास्तु सम्भद्रं निष्पाप मुपलोचनम् ।।

भावार्थः – हे राजन्! दिने दिने ब्राह्मणेषु तव भक्तिः सामर्थ्यानुगुणं वर्धतां, यया प्रत्यक्षमेव ते समृद्धिः, पापानां नाशः च स्यात्।

उदा – अहनि अहनि - प्रत्यहं, शक्तिं मनतिक्रम्य यथाशक्ति, बाडबेषु - अधिबाडबं, भद्राणां समृद्धिः सम्भद्रं, पापानां अभावः - निष्पापं, लोचनयोः समीपे उपलोचनं इत्येवमादयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. नामपूर्वपदाव्ययीभावः

स्वस्यापि भोजने यस्य सूपप्रति न युज्यते ।
शाकप्रत्यथवाऽन्येभ्यः कथं दास्यति स प्रभुः ॥

भावार्थः – यो राजा स्वस्य भोजनेऽपि सूपस्य शाकस्य वा उपयोगं लेशतोऽपि न सहते, तादृशः कृपणाग्रेसरचक्रवर्ती अन्येभ्यः दास्यतीति को नु विश्वसेत् ।

उदा – सूपस्य लेशः सूपप्रति, शाकस्य लेशः - शाकप्रति इत्येवमादयः ।

॥ द्वन्द्वसमासनिरूपणम् ॥

अस्मिन् समासे प्राधान्य मुभयो स्स्यात् पदार्थयोः ।
स हि द्वन्द्व श्चतुर्धा स्या द्बुधै रिति विनिश्चितः ॥

इतरेतरयोगाख्य स्समाहाराह् वय स्तथा ।
द्वाभ्यां पदाभ्यां बहुभि रुभौ चेति चतुर्विधः ॥

भावार्थः – द्वन्द्वसमासः उभयपदार्थप्रधानः । अयं इतरेतरयोगद्वन्द्वः, समाहारद्वन्द्वश्चेति द्विविधः । इमौ द्वावपि द्वाभ्यां पदाभ्यां बहुभिः पदैश्च द्विधा भिद्येते ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तथा च —

१. द्विपदेतरेतरयोगद्वन्द्वः ।
२. बहुपदेतरेतरयोगद्वन्द्वः ।
३. द्विपदसमाहारद्वन्द्वः ।
४. बहुपदसमाहारद्वन्द्वः ।

१. द्विपदेतरेतरयोगद्वन्द्वः

ययो र्बलेन समितौ निहतौ कंसरावणौ ।
सूर्याचन्द्रमसो र्वंश्यौ रामकृष्णा वहं भजे ।।

भावार्थः – सूर्यवंशे समुत्पन्नं श्रीरामं, येन रावणो निहतः; चन्द्रवंशे जातं कृष्णं च, यः कंसं जघान, — तौ अहं भजामि ।

उदा – कंसश्च रावणश्च - कंसरावणौ, सूर्यश्च चन्द्रश्च - सुर्याचन्द्रमसौ, रामश्च - कृष्णश्च - रामकृष्णौ इत्येवमादयः ।

२. बहुपदेतरेतरयोगद्वन्द्वः

वापीकूपतटाकानां महतां स्थापनादपि ।
धर्मार्थिकाममोक्षा श्च सिद्धचन्ते नाऽत्र संशयः ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः – वापीकूपतटाकानां स्थापनेन धर्मार्थ-काममोक्षाः पुरुषार्थाः निस्संशयं सिद्धयन्ति ।

उदा – वापी च कूपश्च तटाकश्च - वापीकूप-तटाकाः, धर्मश्च अर्थश्च कामश्च मोक्षश्च - धर्मार्थं काममोक्षाः, (घटश्च पटश्च कुड्यं च - घटपटकुड्यानि) इत्यादयः ।

३. द्विपदसमाहारद्वन्द्वः

शीतोष्णं सुखदुःखं वा सहन् यो वर्तते सदा ।
नियम्य वाक्त्वचं सम्य क्स हि योगीति कथ्यते ।।

भावार्थः – यः इन्द्रियाणि निगृह्य शीतोष्णं सुखदुःखं च सहते, स एव योगीति उच्यते ।

उदा – शीतं च उष्णं च तयोः समाहारः—शीतोष्णं, सुखं च दुःखं च तयोः समाहारः – सुखदुःखं, वाक्च त्वक्च तयोः समाहारः — वाक्त्वचं इत्येवमादयः ।

४. बहुपदसमाहारद्वन्द्वः

ढक्कामृदङ्गपटहं यस्य दध्वान मन्दिरे ।
अश्वहस्तिरथं यस्य भावुकं तस्य भूभृतः ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भावार्थः – यस्य राज्ञः प्रासादे ढक्का, मृदङ्गः, पटहः इत्यादीनां वाद्यविशेषाणां ध्वनिः प्रतिध्वन्यते, यस्य च रथगजतुरगाणां दलानि मनोज्ञानि, तस्य भूभृतः अवश्यं कुशलं भवति ।

उदा – ढक्का च मृदङ्गश्च पटहश्च तेषां समाहारः - ढक्कामृदङ्गपटहं, अश्वश्च हस्ती च रथश्च तेषां समाहारः - अश्वहस्तिरथं, पाणी च पादौ च ग्रीवा च तेषां समाहारः पाणिपादग्रीवं इत्येवमादयः ।

।। अलुक्समासः ।।

कण्ठेकालं स्मरन्नेव जनुषान्धो हृदिस्पृशम् ।
वाचोयुक्तिं वदन् जीवत्यन्तिकादागतं प्रति ।।

भावार्थः – यः जन्मनैव अन्धः सः सर्वेश्वरं ध्यायन्, यदि यः कश्चित् समीपं आगच्छति, तं उद्दिश्य हृदयङ्गमानि चाटुवाक्यानि वदन् स्वजीवितं यापयति ।

उदा – कण्ठे कालः यस्य सः कण्ठेकालः, जनुषा अन्धः जनुषान्धः, हृदि स्पृशतीति - हृदिस्पृक्, वाचः युक्तिः - वाचोयुक्तिः, अन्तिकात् आगतः, अन्तिकादागतः (पश्यतो हरतीति - पश्यतोहरः) इत्येवमादयः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

।। गतिसमासः ।।

साक्षात्कृत्य हरिं सम्य गलंकृत्य पुरं प्रभो ।
तिरस्कृत्य रिपून्पाहि पुरस्कृत्य द्विजान् भुवम् ।।

भावार्थः – हे राजन्! भगवद्भक्तस्सन्, पुर-परिपालने, तथा तस्य अलङ्करणे च बद्धश्रद्धः सन्, शत्रून् निहत्य, द्विजान् सम्भावयन् च राज्यं कुरु ।

उदा – साक्षात् कृत्वा - साक्षात्कृत्य, अलंकृत्वा - अलंकृत्य, तिरः कृत्वा - तिरस्कृत्य, (ऊरी कृत्वा - ऊरी-कृत्य) इत्येवमादयः ।

।। नित्यसमासः ।।

कुम्भकार स्तन्तुवायो लोहकारक एव च ।
श्रेणयोऽन्येऽपि संस्थाप्याः पार्श्वे ग्रामस्य यत्नतः ।।

भावार्थः – कुम्भकारः, वस्त्रकारः, लोहकारः इत्यादयः अन्ये अपि वृत्तिकाराः ग्रामे ग्रामे यत्नेन स्थापनीयाः ।

उदा – कुम्भं कुरोतीति - कुम्भकारः, तन्तुं वयतीति - तन्तुवायः, लोहं करोतीति - लोहकारः, (तापिञ्छेन संकाशाः - तापिञ्छनिभाः) इत्येवमादयः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शालातुरीयेण महात्मना हि
सर्वे समर्था विहिता स्समासाः ।
तेषूपयुक्ता विहिता स्तथाऽस –
मर्थं तथा ज्ञापकसिद्ध मुच्मः ॥

भावार्थः – महात्मा पाणिनिः सर्वान् समर्थ-समासान् विहितवान् । तत्र उपयुक्ताः समासाः प्रतिपादिताश्च । एवं ज्ञापकेन प्रमाणान्तरेण सिद्धः असमर्थ-समासोऽपि इदानीं प्रतिपाद्यते ।

॥ असमर्थसमासः ॥

तनुमूढूळयन् मर्त्यः शिवभागवतो यदि ।
अरिषड्वर्गत स्तस्य भयं नास्ति कदाचन ॥

भावार्थ – यदि मुमुक्षुः शिवभक्तो भवति, तर्हि तस्य कामक्रोधादिभ्यो भयं न भवेत् ।

उदा – भगवति भक्तः - भागवतः, शिवे भागवतः - शिवभागवतः, षण्णां वर्गः - षड्वर्गः, अरीणां षड्वर्गः - अरिषड्वर्गः, (सूर्यं न पश्यन्ती त्यसूर्यंपश्याः) इत्येव मादयः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रायिक मेषां कथितं प्राधान्यं चातिमालादौ ।
दन्तोष्ठे द्वित्रादौ नैतत्सूपप्रतीत्यादौ ।।

भावार्थः — एतावता प्रबन्धेव प्रतिपादितानां समासानां प्राधान्यं प्रायिकम् । क्वचित् उक्तप्राधान्य-नियमभंगोऽपि दृश्यते । सः यथा — 'अतिमालः' इति तत्पुरुषे पूर्वपदार्थस्य प्राधान्यात्, "दन्तोष्ठं" इति द्वन्द्वे समाहारस्यैव प्राधान्यात्, "द्वित्राः" इति बहुव्रीहौ अन्यतर-स्यैव प्राधान्यात्, "सूपप्रति" इत्यव्ययीभावे उत्तरपदार्थस्य प्राधान्याच्च ।

उदा — मालां अतिक्रान्तः - अतिमालः, दन्तश्च ओष्ठश्च तयोः समाहारः - दन्तोष्ठं, द्वौ वा त्रयो वा - द्वित्राः, सूपस्य लेशः - सूपप्रति ।

एतावता प्रबन्धेन समासवृत्तिः प्रतिपादिता ।

।। कृदादिवृत्तयः ।।

कृत्तद्धितसनाद्यन्तधातुभ्य श्चैकशेषतः ।
समासादपि विद्वद्भिः कथिताः पञ्च वृत्तयः ।।

भावार्थः — कृदादिभ्यः पञ्चवृत्तयः भवन्तीति पण्डिता वदन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ताः यथा —

१. कृद्वृत्तिः ।
२. तद्धितवृत्तिः ।
३. सनाद्यन्तधातुवृत्तिः ।
४. एकशेषवृत्तिः ।
५. समासवृत्तिः

१. कृद्वृत्तिः

भक्तानामपि मर्त्यानां, अमराणां अथापि वा ।
सम्पादयति यां ज्ञानं तां वाचं प्रणमाम्यहम् ॥

भावार्थः – मर्त्यानां वा अमराणां वा भक्तानां या वाग्देवी ज्ञानं सम्पादयति तां अहं नमामि ।

उदा – भजन्त इति - भक्ताः, म्रियन्त इति मर्त्याः, न म्रियन्त इति - अमराः, ज्ञायतेऽनेनेति - ज्ञानं, उच्यते इति वाक् इत्यादयः ।

२. तद्धितवृत्तिः

मानुषा नादितेया न्वा पीडयन्तो भुवि स्थिताः ।
ये दैतेया स्ता म्निहन्तुं जातो दाशरथिः स्वयम् ॥

भावार्थः–मनुष्यान् देवांश्च ये दैत्याः पीडयन्तः आसन् तेषां वधार्थं भगवान् विष्णुः स्वयं दशरथस्य पुत्रो जातः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदा – मनोः अपत्यानि पुमांसः - मानुषाः, अदितेः अपत्यानि पुमांसः - आदितेयाः, दितेः अपत्यानि पुमांसः - दैतेयाः, दशरथस्य अपत्यं पुमान् दाशरथिः, (पुलस्त्यस्य गोत्रापत्यं पुमान् पौलस्त्यः) इत्येवमादयः ।

३. सनाद्यन्तधातुवृत्तिः

यः पास्पर्धीति वा लोकान् देवैः वैरायते सदा ।
राक्षसस्य विनाशाय तस्य पुत्रीयतु प्रभुः ।।

भावार्थः – यो राक्षसः लोकान् भृशं नाशयति, देवैः वैरं आचरति, तस्य राक्षसस्य विनाशाय महाराजः पुत्रकामेष्टिं करोतु इति दशरथं प्रति सुमन्त्रवचनम् ।

उदा – अतिशयेन स्पर्धते - पास्पर्धीति, वैरं आचरति - वैरायते, पुत्रं आत्मन इच्छतु - पुत्रीयतु इत्येवमादयः ।

४. एकशेषवृत्तिः

सर्वेषामपि लोकानां पितरौ यौ सनातनौ ।
विदितौ पालना च्चित्ते तौ शिवौ सततं भजे ।।

भावार्थः – यौ पुराणदम्पती सर्वेषां लोकानां पालनेन जननीजनकत्वेन विख्यातौ, तौ पार्वतीपरमेश्वरौ अहं सततं भजामि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उदा – माता च पिता च - पितरौ, सनातनी च सनातनश्च - सनातनौ, विहिता च विदितश्च - विदितौ, सा च स च - तौ, शिवा च शिवश्च - शिवौ इत्येवमादयः ।

समासवृत्तिः

समासवृत्ति स्सर्वेषु समासेषु निरूपिता ।
परार्थस्याऽभिधानं हि वृत्ति रित्यभिधीयते ।।

भावार्थः – समासवृत्तिः प्राक् अनेकधा निरूपितैव। परार्थाभिधानं वृत्तिः इति उच्यते ।

भो भो मात्सर्य मुत्सार्य वात्सल्या न्मत्कृता मिमाम्।
पश्यन्तु विबुधाः सर्वे समासकुसुमावळिम् ।।

भावार्थः – भोः भोः गुणग्राहिणः पण्डिताः! सर्वेऽपि भवन्तः इमां मद्रचितां समासकुसुमावलिं सकृपाकटाक्षं स्वीकुर्वन्तु ।

श्री मध्यमन्दिर कुलाम्बुधि पूर्णचन्द्र –
श्री सर्वमङ्गळ मनीषिकृता सलीलम् ।
एषा समासकुसुमावळिराब्जतारं
जीया त्कृपानिधि सदाशिव सम्प्रसादात् ।।

भावार्थः – नडिमिण्टि सर्वमङ्गलशास्त्रिप्रणीता इयं समासकुसुमावळिः ईश्वरानुग्रहात् तदा विलसतु ।

।। समासकुसुमावळिः समाप्ता ।।
।। सर्वं श्रीकृष्णार्पणमस्तु ।।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रयोगाः

रामो विराजते रामो भूमण्डल मपालयत् ।
रामचन्द्रो दशग्रीवं परलोक मनीनयत् ।।
रामेणोपार्जिता कीर्तिः रामचन्द्रेण श्रूयते ।
रामेण कुम्भकर्णस्तु प्रापितस्त्रिदशालयम् ।।

१. रामो विराजते – अकर्मककर्तरि प्रयोगः ।

२. रामो भूमण्डलमपालयत् – सकर्मककर्तरि प्रयोगः ।

३. रामचन्द्रो दशग्रीवं परलोकमनीनयत् – द्विकर्मक-कर्तरि प्रयोगः ।

४. रामेणोपार्जिता कीर्तिः – कर्मणि प्रयोगः ।

५. रामचन्द्रेण श्रूयते – भावे प्रयोगः ।

६. रामेण कुम्भकर्णस्तु प्रापितः त्रिदशालयम् – द्विकर्मक-कर्मणि प्रयोगः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परिचयाभिज्ञविचक्षण समर्थ कोविद विद्याभूषण

परीक्षा पाठ्यपुस्तकानि

परिचयकुञ्चिका, संस्कृतरचना (Work Book)

अभ्यासश्च सांस्कृतिकरचनाः

सभायां लभ्येरन्

गैर्वाणी

मासिकी पत्रिका

सुलभा, मनोहरा बालैः प्रौढैः च अपेक्षणीया ।

वार्षिकम् रू. १५-००

प्राप्तिस्थानम् -

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु (आं. प्र)

विजयमुद्रशाला, चित्तूरु. (आं. प्र)

CC-0. In Public Domain. Cuddalore Collection. TN.